# 2017

# SANSKRIT

## [ Honours ]

## PAPER – III

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

## [NEW SYLLABUS ]

1. वाणभट्टकृता कादम्बरी कथा आख्यायिका वा ? सयुक्तिकं प्रतिपाद्यताम् । 10

*अथवा*

का तावत् महाश्वेता ? कादम्बर्य्यां सा कैः सह सन्तुलिता ?

2. संस्कृतभाषया देवनागरलिप्या च एकं व्याख्येयम्— 6

अन्यथैव धवलयन्तीं कैलासगिरिम्, अन्तर्द्रष्टुरपि लोचनपथाप्रविष्टेन श्वेतिमानमिव मनो नयन्तीम्, अतिधवलाप्रभा-परिगतदेहतया स्फटिकगृहगतामिव दुग्धसलिलभग्नाविव विमलचिनांशुकान्तरितामिव आदर्शतलसंक्रान्तामिव शरदभ्रपटलतिरस्कृतामिव अपरिष्फुटविभाव्यमानाव्यवाम् ।

*अथवा*

काशकुसुमविकाशकान्तिमिव शरत्समयमुदोक्षमाणाम्, शेषशरीरच्छायामिव रसातलमपहाय निर्गताम्, मुषालायुधदेहप्रथामिव मधुमदविघूर्पनायासविगलिताम्, शुक्लपक्षपरम्परामिव पुञ्जीकृताम्, सर्वहंसैरिव धवलतया कृतसंविभागाम् ।

3. सरलसंस्कृतेन देवनागरलिप्पा च प्रश्नचतुष्टयं समाधेयम्— 1 × 4

(*a*) कथं महाश्वेता हराराधानायां प्रवृत्ता आसीत् ?

(*b*) चन्द्रापीड़ेन कीदृशी कन्या दृष्टा ?

(*c*) 'स्वभानुः' इति शब्दस्य कोऽर्थः ? तद्भयात् केन कथं शिवशरणं नीतम् ?

(*d*) मुषलायुधः कः ? मधुमदेन किं च विगलितम् अभवत् ?

(*e*) महाश्वेतायाः वीणा कीदृशी आसीत् ?

(*f*) शरत्कालस्य प्रतीक्षा केन कृता ?

4. महाकाव्यरूपेण रघुवंशं सार्थकं न वेति विचार्यताम् । 10

***अथवा***

'रघुवंशम्' इति महाकाव्यस्य प्रथमासर्गानुसारं राज्ञः दिलीपस्य चरित्रम् उद्धृतिपुरः सरम् उपवर्ण्यताम् ।

5. संस्कृतभाषया देवनागरलिप्या च एकः व्याख्येयः— 6

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।

***अथवा***

सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।
स्थितः सर्वोन्नतेनोर्वी क्रान्त्वा मेरुरिवात्मना ।।

6. सरलसंस्कृतेन देवनागरलिप्या च प्रश्नचतुष्टयं समाधेयम् — 1 × 4

(*a*) रामचन्द्रस्य स्कन्धः केन तुलितः ?

(*b*) 'दुदोह गां यज्ञाय' — 'गाम्' इति शब्दस्य कोऽर्थः भवति ?

(*c*) 'कुलकम्' इति शब्दस्य कोऽर्थः ?

(*d*) इक्ष्वाकुः कः आसीत् ?

(*e*) कालिदासानुसारं दिलीपस्य पिता कः आसीत् ?

(*f*) आश्रममृगैः उटजद्वारं कथम् अवरुद्धं जातम् ?

7. 'नारिकेलफलसम्मितं वचो भारवेः' — व्याख्यायताम् । 10

*अथवा*

किरातार्जुनीयस्य प्रथमसर्गे युधिष्ठिरं प्रति द्रौपद्याः वचनमुद्धृतिपुरःसरम् आलोच्यताम् ।

8. संस्कृतभाषया देवनागरलिप्या च एकं व्याख्येयम् — 7

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः ।।

अथवा

कथाप्रसङ्गेन जनैरुदाहृता —
दनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानात् व्यथते नताननः
सुदुःसहान्मन्त्रपदादिवोरगः ॥

9. सरलसंस्कृतेन देवनागरलिप्या च पञ्चानाम् उत्तरं लिखत — 1 × 5

(*a*) 'किरातार्जुनीयम्' कीदृशं महाकाव्यम् ?

(*b*) 'किरातार्जुनीयस्य उत्सः कः अस्ति ?

(*c*) 'त्रिगणः' इति शब्दस्य कोऽर्थः ?

(*d*) कः वर्णिलिङ्गी ?

(*e*) कस्य सम्पदः स्वयमेव वश्याः भवन्ति ?

(*f*) हितैषिणः कीदृशं वचनं प्रवक्तुमिच्छन्ति ?

(*g*) वनेचर-शब्दस्य कोऽर्थः ?

10. (*a*) एकस्य व्यासवाक्येन समासरूपं निर्णय — 1 × 1

चारचक्षुषः, किंसखा ।

(*b*) एकस्य कारकविभक्तिः निर्णेया — 1 × 1

(*i*) न वञ्चनीयाः प्रभावोऽनुजीविभिः

(*ii*) युधिष्ठिरं द्वैतवने वनेचरः ।

(*c*) एकस्य प्रकृति-प्रत्ययौ निरूप्येताम् — 1 × 1

(*i*) समुन्नयन् ,

(*ii*) उदाहृतात् ।

**11.** 'माघे मेघे गतं वयः'— व्याख्यायताम् । 10

*अथवा*

शिशुपालवधस्य प्रथमसर्गानुसारं देवर्षेः नारदस्य अलौकिकावतरणदृश्यं निर्वर्ण्य तं प्रति श्रीकृष्णस्य अभ्यर्थनप्रकारः उपवर्ण्यताम् ।

**12.** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गम् एकं व्याख्येयम् — 7

गतं तिरश्चीनमनुरूसारथेः प्रसिद्धमूर्धज्वलनं हविर्भुजः ।
पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः ।।

*अथवा*

रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे ।
वलत्पलाशन्तरगोचरस्तरोस्तुषार भूर्त्तस्वि नक्तमंशवः ।।

**13.** सरलसंस्कृतेन देवनागरलिप्या उत्तरं लिखत(पञ्चानाम् ) — 1 × 5

(*a*) शिशुपालवधम् इति महाकाव्ये कति सर्गाः सन्ति ? प्रथमसर्गस्य विशेषनाम किमस्ति ?

(*b*) नारदः कस्य वार्त्तया सह कं सकाशम् आगतः ?

(*c*) 'नारददर्शनस्य फलं किमस्ति ?

(*d*) 'व्यनक्ति कालत्रितयेऽपि योग्यताम्' — किं तावत् काल-त्रितये योग्यताम् व्यनक्ति ?

(*e*) श्रोकृष्णस्य 'पुण्डरीकाक्षः' इति नाम कथं सार्थकम् अभवत् ?

(*f*) 'सहस्र भानुना'- भानुना इति पदस्य कोऽर्थः ?

(*g*) 'तापिञ्छ' इति शब्दस्य कोऽर्थः ?

**14.** (*a*) एकस्य व्यासवाक्येन सह समासरूपं लिखत— 1 × 1

हविर्भुजः, रथाङ्गपाणिः ।

(*b*) प्रकृति-प्रत्ययौ निर्णयतः (एकस्य )— 1 × 1

ईक्षितम्, उवाच ।

(*c*) अधस्तनाव्यययोगेन संस्कृतेन वाक्यं रचय (एकस्य )— 1 × 1

यतः, ततः